Janu-June-2023

2

ISSN 2250-1711

॥ सत्यं ज्ञानमनन्तम् ॥

# JOURNAL OF VEDA SAMSKRITA ACADEMY

# जर्नल् आफ् वेद संस्कृत अकाडेमि

**Recognised in the UGC-CARE List**

**A NATIONAL PEER-REVIEWED RESEARCH JOURNAL**

**विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता**

**मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका**

**VOLUME: XXI**
**January to June – 2023**

Editor in Chief :
**DR. GOPALKRISHNA HEGDE**
[Jyotishashastra-Dharmashastra Vidwan]

**VEDA SAMSKRITA ACADEMY (Regd.)**

Formerly : Veda Samskrita Prasarinee Sabha (R.)
Regd. No. : DR : SOR : 108 : 2003-04, Dated : 30-10-2003
Registered under Societies Registration Act, of Karnataka-1960

**Registered office address :**

# 1347, Kalkod Road, HEGDE-581330, Kumta, Uttarakannada, Karnataka, India
E-mail ID : vedasmkac@gmail.com
Website : www.vedasamskritaacademy.org

Scanned with CamScanner

Volume XXI : January to June – 2023, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# तत्त्वचिन्तामणेर्व्याप्तिसप्तकस्य तृतीयलक्षणे गदाधरमतविमर्शः

Riya Pal
State Aided College Teacher, Dept. of Sanskrit
Chatna Chandidas Mahavidyalaya
P.O. – Chatna – 722132
Dist – Bankura, West Bengal
Contact No. : 7031707927 / 7362994749
Email: riyapalsanskrit10@gmail.com

## उपोद्घातः –

प्राचां तथार्वाचां नैयायिकानां नयानुसारमनुमितिं प्रति व्याप्तेरुपयोगित्वं स्वीकृत्य नैयायिककुलचूडामणिना गङ्गेशोपाध्यायेन व्याप्तेर्निर्दुष्टं लक्षणं कृतम्। तत्रापि पूर्वपक्षिणां मतसम्मतानि व्याप्तिलक्षणानि नव्यन्यायदिशा निरूप्य दोषान् च प्रदर्श्य सिद्धान्तलक्षणं निरूपितम्। गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ प्रप्रथमं व्याप्तेः सप्तलक्षणानि पूर्वपक्षलक्षणत्वेन उपस्थापितानि। तत्र साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्, सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्, साध्यवदन्यावृत्तित्वम्[1] इत्येतानि प्राचां नैयायिकानां लक्षणानि इति तत्त्वचिन्तामणौ निगदितानि। ततश्च साध्यासामानाधिकरण्यानाधिकरणत्वं[2] साध्यवैयधिकरण्यानाधिकरणत्वं[3] चेति सिंहव्याघ्रलक्षणे निरूपिते गङ्गेशोपाध्यायैः तत्त्वचिन्तामणौ।प्रकृते प्रवन्धे तत्त्वचिन्तामण्युक्तं व्याप्तेस्तृतीयलक्षणमाश्रित्य रघुनाथशिरोमणिरचिताया दीधितिटीकायाः गादाधरीटीका पर्यालोच्यते -

## गदाधरदिशा तृतीयलक्षणस्य सद्धेतौ सङ्गतेस्तथा असद्धेतावसङ्गतेर्विचारः –

साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं व्याप्तिरि[4]ति तृतीयलक्षणम्। साध्यवत्प्रतियोगिकान्योन्यभावाधिकरण निरूपितवृत्तित्वाभावो व्याप्तिरिति पर्यवसितार्थः। तथा च वह्निमान् धूमाद् इत्यत्र साध्यो वह्निः, साध्यवान् वह्निमान् – पर्वतादिः, साध्यवत्प्रतियोगिकान्योन्याभावः – वह्निमान् न इति भेदः, साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणम् – जलह्रदादिकम्, साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपस्य साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यस्य धूमरूपहेतौ सत्त्वाल्लक्षणसमन्वयः।

एवं च धूमवान् वह्नेः इत्यत्र साध्यः – धूमः, साध्यवान् – धूमवान् – पर्वतादिः, साध्यवत्प्रतियोगिकान्योन्याभावः – धूमवान् न इति भेदः, साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणम् – अयोगोलकम्, साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणनिरूपितवृत्तित्वस्यैव वह्निरूपहेतौ सत्त्वात् साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणनिरूपिवृत्तित्वाभावरूपस्य साध्यवत्प्रतियोगिकान्योन्याभावासमानाधिकरण्यस्य व्याप्तिलक्षणस्य असङ्गमनात् न अतिव्याप्तिः।

## गदाधरदिशा तृतीयलक्षणपरित्यागबीजविचारः–

हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेन अव्याप्तेराह – सकलेति इति तृतीयलक्षणपरित्यागबीजमूलिका दीधितिः गदाधरेण स्वीयवैदुष्येण व्याख्याता। तथा च, गदाधरनये यस्य हेतोः अधिकरणं नाना भवति तादृशसद्धेतौ तृतीयलक्षणस्य अव्याप्तिः भवति। अतः तृतीयलक्षणं परित्यज्य चतुर्थलक्षणपर्यन्तानुधावनम्। तथाहि वह्निमान् धूमाद् इत्यत्र हेतुः धूमः। धूमस्य अधिकरणं नाना भवति पर्वतमहानसादिभेदात्। अतः वह्निमान् धूमाद् इत्यत्र अव्याप्तिः अस्य लक्षणस्य भवति। यथा वह्निमान् धूमाद् इत्यत्र साध्यो वह्निः,